ASHA ARCHIVES
1.514
ASHA ARCHIVES

श्रीगणेशायनमः

स्वाटीष्टव

ASHA ARCHIVES
1.514
ASHA ARCHIVES

श्रीगणेशायनमः प्रणम्यशिरसादेवंगौरीपुत्रविनायकं भक्तावा
सस्मरेन्नित्यंमायुकामार्थसिद्धये १ प्रथमंवक्रतुंगजहेरंबंद्वितीय
कं तृतीयंकृष्णपिंगाक्षंगजवक्त्रंचतुर्थकं २ लंबोदरंपंचम
ंचषष्ठंविकटमेवच सप्तमंभालचंद्रंतथाष्टमं ३ नव
मंभालचंद्रंचदशमंतुविनायकं एकादशंगणपतिंद्वादशंतुगजान
न ४ येतद्वादशनामानित्रिसंध्यंयः पठेन्नरः नचविघ्नभयंतस्य
सर्वसिद्धिकरंप्रभो ५ विद्यार्थिलभतेविद्याधनार्थिलभतेधनं

पुत्रार्थिलभतेपुत्रंमोक्षार्थिचाप्नुयांगति ६ जपेन्नगणपतिस्तो
त्रंभक्तियुक्तेनचेतसा संवत्सरेणसिद्धिंचलभतेनात्रसंशयः ७
अष्टानांब्राह्मणानांचलिखित्वायःसमर्पयेत् तस्यविद्याभ
वेत्सर्वागणेशस्यप्रसादतः ८ इतिश्रीनारदपुराणेगणेश
स्तोत्रंसम्पूर्णमिति

शुभम्

श्रीगणेशायनमः श्रीगुरुभ्योनमः आचम्य ॐआत्मानन्तायस्वाहा
ॐविद्यानन्तायस्वाहाः ॐशिवनन्तायस्वाहाः करेजलंगृहीत्वा ॐअ
द्यामुकमासेअमुकपक्षेअमुकतिथौकापश्यपगोत्राश्मअविनामणि
शर्मणाः श्रीमत्कुलसुंदरीदेवीप्रीत्यर्थंयथोपचारैःअर्चयिष्ये
आसनमंत्रस्यमेरुपृष्ठऋषिसुतलंछन्दःकूर्मोदेवता आसनोपवे
शनेविनियोगः ॐआधारशक्तिकमलासनायनमः पृथ्वीत्वया
धृतालोकादेवीत्वंविष्णुनाधृताः त्वंचधारयमांनित्यंपवित्रंकुरु
चासनं ॐद्वारदेवतायैनमः ॐकालपुरुषायनमः ततोम्ह

लेन दिव्यदृष्ट्यावलोक्यदिव्यांविघ्नान्समुत्सार्य्य अस्त्रायफट्जले
नोत्तरिष्यगान्विघ्नान्समुत्सार्य्य वामपादपार्ष्णिघातत्रयेणभौमान्वि
घ्नान्समुत्सारयेत् अक्षतैः अपसर्पंतुयेभूतायेभूताभुविसंस्थि
ताः येभूताविघ्नकर्तारस्तेनश्यंतिशिवाज्ञया अथभूतशुद्धि
प्राणायामः यावद्पूरयाद्६४कुंभक अरेचक तथैवा ल ६।१६
३२ ल १६।६४।३२ अथप्राणप्रतिष्ठा हृदिहस्तंदत्वा आंह्रींक्रोंयं
त्वंशंषसहसोहंममप्राणाइहप्राणाः आंह्रींक्रोंयं सोहंमम
सर्वेंद्रियाणिइहागत्यइहतिष्ठंतुसुखंचिरंतिष्ठंतुस्वाहा॥ ॥

हृदि इच्छादिपरापरायेइत्येनं सौं सदाशिवाय महाप्रेतपद्मासना
यनमः अथमूलदेवतायास्यासः ॐ दक्षे गुरुभ्यो नमः ॐ वामे ग
णेशायनमः मध्ये श्रीमत्कुलसुंदरीदेवतायैनमः अथप्राणाया
मः ऐं १६ पूरं क्लीं ६४ कुंभकं सौं ३२ रेचकं ॥ अस्य श्रीकुलसुंदरीदे
व्या मंत्रस्य दक्षिणामूर्तिऋषिः शिरसि पङ्क्तिछन्दसे नमः मुखे श्री
कुलसुंदरीदेवतायैनमः हृदि ऐं बीजाय नमः गुह्ये सौं शक्तयेन
मः पादयोः क्लीं कीलकाय नमः नाभौ ममाभीष्टसिद्ध्यर्थे जपे
विनियोगः ऐं अंगुष्ठाभ्यां नमः क्लीं तर्जनीभ्यां स्वाहा सौं मध्यमा

भ्यां वषट् ऐं अनामिकाभ्यां हुं क्लीं कनिष्ठाभ्यां वौषट् सौं करत
लकरपृष्ठाभ्यां फट् अथषडंगन्यास ऐं हृदयाय नमः क्लीं शिर
से स्वाहा सौं शिखायै वषट् ऐं कवचाय हुं क्लीं नेत्रत्रयाय वौ
षट् सौं अस्त्राय फट् ॥ ध्यानं ॥ अरुणाकिरणाजालैरंजितासाव
काशाविधृतजपवटीकापुस्तकाभीतिहस्ता इतरकरवराढ्या फु
ल्लकह्लारसंस्थानिवसतु हृदि बालानित्यकल्याणशीला पठित्वा
मानसोपरैः संपूज्य किंचिन्मूलमंत्रं जपित्वा अर्घ्यस्थापनक
र्यात् तद्यथा भूमौ त्रिपादिकाअर्घ्यसहितं संस्थाप्य जलपू

रयजलमध्येमूलेन जप्य इतिसामान्यार्घः ॥ अथविशेषार्घं ॥ भा
त्मदेवयोर्मध्ये सामान्यार्घजलेनविशेषार्घस्थापनस्थाने त्रिको
णं लिख्य तदुपरि उद्यानादिपीठं यं नमः पूज्य त्रिपदिकासामान्या
र्घजलेन सौः फट् प्रोक्ष्य त्रिकोणोपरि स्थाप्य तदुपरि वह्निमंड
लाय दशकलात्मने नमः त्रिपादिकासंपूज्य तदुपरि रं फट् अ
र्घं संप्रोक्ष्य स्थापयेत् तदुपरि अं सूर्यमंडलाय द्वादशकलात्मने
नमः अर्घं संपूज्य तदुपरि मूलमंत्रेण अर्घजलं पूर्य तज्जलेभौ
सोममंडलाय षोडशकलात्मने नमः जलं संपूज्य गंगे च यमुने चा

दिनातिर्थं मावाहं अंकुशमुद्रया जलं त्रिकोणं संलिख्य जलं स्पृ
मूलेन जप्त्वा मूलदेवं तज्जले इहागच्छ वाह्य अर्घं वाहो पूजये
तद्यथा रं हृदयाय नमः अर्घस्य अग्निकोणे क्लीं शिरसे स्वाहा
ईशाने सौः शिखायै वषट् निऋत्यां ऐं कवचाय हुं वायव्ये क्लीं नेत्र
त्रयाय वौषट् अग्रे सौं अस्त्राय फट् सर्वत्र तदुपरि मद्यमुद्रया आ
छाद्य मूलं जप्य तदुपरि हं अवगुंठ्य वेधेन मुद्रां प्रदर्श्य ऐं योनिमुद्रां
प्रदर्श्य वषट् गालिनीमुद्रां दर्शयेत् तज्जलं किंचित् पात्रांतरे गृही
त्वा मूलदेवतास्वशरीरे पूजाद्रव्याणि संप्रोक्ष्य इति अर्घस्थापनं अथ

पीठपूजा ॐ आधारशक्त्यादिपरापरायै इमं स्त्री सदाशिवाय प
रापरेन पद्मासनाय नमः तत्रैव गुरुपरमगुरुपरापरगुरुपरमेष्ठी
गुरुआचार्य्यगुरुभ्यो नमः इति पीठपूजां कृत्वा पीठदेवीआवाहये
त् तद्यथा अथ त्रिकोणाग्रमध्ये पुष्पं धृत्वा मूलाधारात् कुंडलिनी
उत्थाप्य तया सह षट्चक्रभेदक्रमेण हृदयाद्यंतः स्फुरंतीं तां तेजो
मयीं सुषुम्णामार्गेण ब्रह्मरंध्रे नीत्वा तत्तेजसंगमेनामृतांबुधौ
क्षरंतीं विभाव्य शिवशक्तिसामरस्यं अनुभूय वह्न्यासाद्यं तदेवी
कुसुमांजलावानीय इत्यनेन पुष्पं पीठे स्थापयेत् देवेशि भक्ति

सुलभे परिवारसमन्विते एष्यामि तावत्त्वं सुस्थिरो भव आवाहनमुं
द्रां कुर्यात् तद्यथा आवाहनीयस्थापनीयं संनिरोधनीसकली
करणी अवगुंठिनी धेनुयोनिमुद्रां दर्शयेत् अथ देवतायाः प्राणा
प्रतिष्ठा तद्यथा पीठस्पृष्ट्वा ॐ ह्रीं क्रौं यं रं लं वं शं षं सं हं सः श्रीकुल
सुंदरीदेव्याः प्राणा इह प्राणाः ॐ ह्रीं क्रौं यं सश्रीकुलसुंदरीदेव्या
जीव इह स्थितः ॐ ह्रीं क्रौं यं सश्रीकुलसुंदरीदेव्याः सर्वेंद्रियाणि
ॐ ह्रीं क्रौं यं सश्रीकुलसुंदरीदेव्याः वाङ्मनश्चक्षुश्रोत्रघ्राणप्राणा
इहागत्य सुखं चिरं तिष्ठंतु स्वाहा अथ मुद्रां दर्शयेत् तद्यथा

वरद अभयं पुस्तकअक्षमाला ततः षोडशोपचारैः पूजयेत्
मूलमुच्चार्य श्रीमत्कुलसुंदरीदेव्यै इदमासनं नमः मूलं श्री० व्या
इदमर्घ्यपाद्यं नमः एवं अर्घ्यं स्वाहा आचमनीयं स्वधा मधुपर्कं स्व
धा आचमनीयं स्वधा स्नानं नमः वस्त्रं नमः अलंकारं नमः चंदनं नम
पुष्पं वौषट् धूपं नमः दीपं नमः अर्घ्यजलेन स्थलं निमन्त्र्य चतुरस्रं कृत्वा
तदुपरि नैवेद्यपात्रं स्थाप्य जलेन प्रोक्ष्य मूलं जप्त्वा चक्रमुद्रया अभि
संरक्ष्य येषेनमुद्रया मनीकृत्य अमृतोपस्तरमसि स्वाहेति आचम्य
प्राणाय स्वाहेति पंचमुद्रया ग्रासं दत्वा स्वयं हस्तेन स्व

मुखमाछाद्य मूलं जप्त्वा पश्चादाचमनीयं अमृतोविधानमसि स्वाहेति
जलं दत्त्वा श्रीमत्कुलसुंदरीदेवीनैवेद्यं नमः श्रीतांमूलं नमः दक्षिणां
समर्पयामि ततः मूलेन पुष्पांजलिं दत्त्वा आवरणपूजामारभेत्
ततो हृदादिचक्रस्थाआवरणदेवताभ्यो नमः ततो बलिदानं स्व
वामे त्रिकोणं चतुरस्रं लिखित्वा अर्घ्यत्रसलिलपात्रं स्थापयेत्
ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो ॐ स्वाहा सामान्योदकेन ता
वत्तत्त्वमुद्रया जलं क्षिपेत् अर्घोदकेन स्वशरीरं प्रोक्ष्याचम्य
ततः मूलेन पुष्पांजलित्रयं दत्त्वा जपसमारभेत् तद्यथा हसौ

जलं गृहीत्वा अद्य अमुकमासे अमुकपक्षे अमुकतिथौ काश्यप
गोत्रास्मच्चिंतामणिशर्मणः श्रीमत्कुलसुंदरीदेवीप्रीत्यर्थं एत
न्मूलमंत्रजपमहं करिष्ये शिरसि दक्षिणा मूर्त्ति ऋषयेनमः
मुखे पंक्तिछंदसेनमः हृदये श्रीमत्कुलसुंदरीदेवतायैनमः
गुह्ये ऐं बीजायनमः गुह्ये सौः शक्तयेनमः पादयोः क्लीं कीलका
यनमः नाभौ समाभीष्टसिद्ध्यर्थे जपे विनियोगः ऐं अंगुष्ठाभ्यां न
मः क्लीं कनिष्ठिकाभ्यां वौषट् सौः मध्यमाभ्यां वषट् ऐं अनामि
काभ्यां हुं क्लीं कनिष्ठिकाभ्यां वौषट् सौः करतलकरपृष्ठाभ्यां फट्

एवं हृदादिषडंगन्यासं कुर्यात् देवतायाध्यानं पठेत् यथाशक्ति
मूलेन जपं कुर्यात् हस्ते जलं कोदकं गृहीत्वा गुह्यादि गुह्यगोप्त्री
कुरु हाराणां मत्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरी
यत्रेन देव्या वामहस्ते जपं समर्प्य पुनः षडंगन्यासं कुर्यात्
ततः स्तवकवचादि पठित्वा पुष्पांजलिं दत्त्वा प्रणमेत् मूलदेव
तांगे आवरणदेवतां विलोप्य श्रीमत्कुलसुंदरीदेवी क्षमस्वेति
विसर्ज्य संसारमुद्रया तत्तेजः पुष्पे सार्द्धं हृदयमानयेत् ततः
ईशान्यादिदिशि मंडिकां कृत्वा षट्कोणं दत्त्वा अष्टदिक्षु चांडालिन्यै

नमः यथासुखं विहरेत् भूभं अथ पीठपूजा ॐ आ
धारशक्तयेनमः ॐ कूर्माय ॐ अनंताय पद्मे क्षीरसमुद्राय
श्वेतद्वीपाय मणिमंडपाय रत्नसिंहाय आग्नेयकोणे धर्माय
ईशाने ज्ञानाय नैर्ऋते वैराग्याय वायव्ये ऐश्वर्याय पूर्वे अ
धर्माय उत्तरे अज्ञानाय पश्चिमे वैराग्याय दक्षिणे अनैश्वर्या
य मध्ये अनंताय पद्माय हंसमंडलाय द्वादशकलात्मने
वह्निमंडलाय दशकलात्मने सत्त्वाय रजसे तमसे
आत्मने अंतरात्मने परमात्मने ज्ञानात्मने पूर्वादिदलेषु इच्छा

ये ज्ञानाये क्रियाये कामिन्ये कामदाये इन्ये रतिप्रियाये
रत्नाये मध्ये मनोन्मन्ये ऐ पराये परापराये सौ सदाशिवाय
महाप्रेतपद्मासनाय नमः तत्रैव गुरुपंक्तिं पूजयेत् तद्यथा ॐ
गुरुभ्यो परमगुरुपादुकाभ्यो परापरगुरुभ्यो परापरगुरुपा
दुकाभ्यो परमेष्ठीगुरुभ्यो परमेष्ठीगुरुपादुकाभ्यो आचार्य्ये
भ्यो आचार्य्यपादुकाभ्यो नमः इति अथावरणपूजा आग्ने
ये ऐं हृदयाय नमः ईशाने क्लीं शिरसे स्वाहा नैर्ऋते सौः शिखा
यै वषट् वायव्ये ऐं कवचाय हुं अग्रे क्लीं नेत्रत्रयाय वौषट्

सर्वदिक्षुपासो असुरायफट् ॐ रत्यै० ॐ प्रीत्यै० ॐ मनोभवायै उन्न
रो ह्रीं कामदायै मन्मथाय० दक्षिणो ऐं कंदर्पाय० ह्रुं मकरध्व
जाय० अग्रे स्त्रीं मीनकेतनाय० १ ऐं क्लीं ह्रूं स्त्रीं तः सुभगायै
२ भगायै०।३ भगसर्पिरूपे०।३ भगमालिन्यै०।३ अनंगायै०।३
अनंगकुसुमायै०।३ अनंगमेखलायै न३ अनंगमदनायै॥ २ ॥
असितांगभैरवब्राह्मीभ्यां० रुरुभैरवमाहेश्वरीभ्यां० चंडभैरवकौ
मारीभ्यां० क्रोधभैरववैष्णवीभ्यां०।उन्मत्तभैरववाराहीभ्यां०
कपालभैरवइंद्राणीभ्यां० भीषणभैरवचामुंडाभ्यां संहारभैरव

महालक्ष्मीभ्यां नमः ३ लं इंद्राय० रं अग्नये यं यमाय क्षं निर्ऋत
ये वं वरुणाय० यं वायवे सं सोमाय० हं ईशानाय० इं ऊर्ध्वा
नयोर्मध्ये आं ब्रह्मणे० ह्रीं अनंताय०
४ वज्राय शं शक्तये० दं दंडाय० खं खड्गाय० पं पाशाय० अं
अंकुशाय० गं गदाय त्रिं त्रिशूलाय पं पद्माय० चं चक्राय नमः ५
॥ ॥श्रीगणेशाय नमः॥ अस्य श्री नवग्रहस्तोत्रमंत्रस्य वेद
व्यासऋषिः आदित्यादिनवग्रहा देवता अनुष्टुप् छंदः श्रीं जं स्वाहा
शक्तिः वनुर्विधपुनषार्थसिद्ध्यर्थे नवग्रहस्तोत्रजपे विनियोगः

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिं तमोऽरिं सर्वपापघ्नं प्र
णतोस्मि दिवाकरं १ दधिशंखतुषाराभं क्षीरोदार्णवसंनिभं
नमामि शशिनं देवं शंभोर्मुकुटभूषणं २ धरणीगर्भसंभूतं वि
द्युत्समप्रभं कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहं ३
प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधं सौम्यं सर्वगुणोपेतं
तं नमामि शशिनःसुतं ४ देवानां च ऋषीणां च गुरुं कांचनसं
निभं बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिं ५ हेमकुंभप्र
णाभासं दैत्यानां प्रणमे गुरुं सर्वशास्त्रप्रवक्तारं भार्गवं प्रणा

माम्यहं ६ नीलांजनसमाभासं रविपुत्रं महाग्रहं छायामार्तंडसं
भूतं तं वंदे शनिश्वरं ७ अर्धकायं महावीर्यं चंद्रादित्यवि
मर्दनं सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहं ८ पालाशपु
ष्पसंकाशं तारकाग्रहमस्तकं रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमा
म्यहं ९ इदं व्यासमुखोत्पन्नं यः पठेत्सुसमाहितः दिवा वा यदि
वा रात्रौ विघ्नशांतिर्भविष्यति १० नवग्रहकृतां पीडां तं भव
त्यिकसंचयः ऐश्वर्यमतुलं तेषां आरोग्यं पुत्रसंपदः तस्मान्नरैः न
रैर्नारीभिश्च भवेद्दुःस्वप्ननाशनं ११ नरस्य महतीपीडा तस्करा

समुद्रवैः ताःसर्वाप्रशमंयांतिव्यासोमुक्तेनसंशयः १२ इति
श्रीव्यासोक्तनवग्रहस्तोत्रसंपूर्णं॥
श्रीगणेशायनमः ध्यानं सिंहारूढंत्रिनेत्रंदशभुजमुरगांकुंडले
वांगदेवमुक्तामालांवहंतंसुललितमुकुटंस्रग्सुदाक्षसूत्रं नाना
देवर्षिवृंदैरुरगनमनिशंवक्रतुंडंगजास्यं भक्तेक्षोपांतेदहंमुर
नरवरदंचिंतयेएकदंतं १ सर्वेऽङ्गः यतोनंतशक्तेरनेकाश्चजी
वायतोनिर्गुणादप्रमेयाकुराले यतोभातिसर्वत्रिधाभेदभि
न्नंसदानंगणेशंनमामोभजामः १ यतश्चाविरासीज्जगत्स
र्ववेतुः तथाह्यासनेवीक्ष्यगोविश्वगोसार्थेंद्रादयोदेवसंघा
मनुष्यासदातं० २ यतोवह्नीभानुर्भवोभूर्जलंचयतः सागरा
श्चंद्रमाव्योमवायुः यतस्थावराजंगमाःवृक्षसंघाःसदानंगणे
शंनमामो० ३ यतोदानवाकिंनरायक्षसंघायतः श्वापदाविर
ताश्चापदाश्चयतःपक्षिकीटायतोकिरिरूपाश्च सदानंगणे
शंनमामो० ४ यतोबुद्धिरज्ञानतानाशोमुक्षोयतःसद्पदोभक्त
संतोषकामुः यतोविघ्नतानाशोयतःकार्यसिद्धिः सदानंगणेशं
नमामो०५ यतःपुत्रसंपद्यतोवांछितार्थायतोभक्तिविद्याल

थानेकरूपा यतःशोकमोहोयतःकामएषःसदातंगणेशंन
मामी० ६ यतोनंतशक्तिःसशेषोभवकोधराधारणोनेकरू
पेवशक्तःश्चयतोनेकधास्वर्गलोहितानासदातंगणेशंनमा
मी० ७ यतोवेदवाचेतिकुंठामनोभिःसदानेतिनेतिनियंना
ष्टरोति परब्रह्मरूपंविदानंतरूपंसदानंतगणेशंनमामी०
८ एवंनत्वाचसुलावसर्वेतेनगजाननं पुनरुवुर्गणाध्यक्षो
ध्यायध्वंयतमानवयं ९ ध्यंतपोदानंचज्ञानयक्षश्चसर्वजाः
अद्यनोदृष्टयोधन्यायोदिर्दृष्टोगजाननः १० एवंवाभ्याम्यमे

तेषांगांभीर्याद्विरदाननः ११ नेतादृशंमयादर्शिब्रह्माविष्णुशिवादि
षु यत्साक्षाद्दृश्यतेसर्वंरूपंमेनिर्गुणास्पयत १२ अतिनुष्टोनया
सुत्वावरान्दातुमिहागतः यद्यद्वांछितंतत्तद्दास्यामिसकलंनतु
१३ —कउवाच एवमुक्तस्तदानेनविकटेनमुनेश्वरात् यस्ययद्व
छितंतत्तद्दुःस्मातस्मैगजाननात् १४ असंख्यातानावरानांचना
स्तिशक्तिश्चनुर्मुखः गदितुंसर्वथानस्माऽकंसंक्षेपतोमया १५
पुनरूचेगणाध्यक्षस्तोत्रमेतज्जपेन्नरः त्रिसंध्यंत्रिदिनांतस्यसर्वका
र्यंभविष्यति १६ योजपेदष्टदिवसंश्लोकाष्टकमिदंशुभं अष्टं

वारं चतुर्थ्यां तु सोष्टसिद्धीरनवाप्नुयात् १७ यः पठेन्मासमात्रं तु प
क्षवारदिने दिने समोदयेद्वधगतं राजवश्यं न संशयः १८
विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् इप्सितं लभते सर्वं
येकविंशतिवारतः १९ योजपेत्सख्याभक्ष्यागतानतपरो नरः
एवमुक्त्वा ततो देवः सर्वेषामेव पश्यतां २० इति श्रीगणेशपु
राणे गणपतिसंकटनाशनस्तोत्रसंपूर्णमस्तु
श्रीगणेशायनमः ईश्वरउवाच भृगुदेवि प्रवक्ष्यामि कवचं स
र्वसिद्धिदं पठित्वा धारयित्वा च मुच्यते सर्वसंकटात् १ अहं त्वा

कवचं देवि गणेशस्य मनुं जपेत् सिद्धिर्व्रजायते तस्य कल्पकोटि
शतैरपि २ ॐ आमोदः शिरसः पातु प्रमोदश्च शिरोपरि संमोदः
भ्रुवोः पातु भ्रूमध्ये च गणाधिपः ३ गणाक्रीडश्चक्षुयुग्मं नासायां
गणनायकः गणक्रीडाश्चितः पातु वदने सर्वसिद्धये ४ जिह्वा
यां सुमुखः पातु ग्रीवायां दुर्मुखः सदा विघ्नेशो हृदये पातु विघ्ना
शः स्तनवक्षसि ५ गणानां नायकः पातु बाहुयुग्मं सदा मम विघ्नक
र्ता च उदरे विघ्नहर्ता च लिंगके ६ गजवक्त्रः कटीदेशे एकदंतो
नितंबके लंबोदरः पातु पृष्ठे गुह्य

पुत्रांसंतकलत्रंगुरावदभिमतंयद्धदेतद्वसंनित्यंयःस्तोत्रमेतत्प
ठतिगणपतेस्तस्यहस्तेसमस्तं १०१ गणांजयोगणपतिर्हेरंबो
धरणीधरः महागणपतिर्लक्ष्मेश्वरःक्षिप्रप्रसादनः १ आमोदमि
द्धिरमृतंनित्यंविनामणिर्निधिः सुमंगलोबीजमाशापूरकोवरदः
कलः २ काश्यपोनंदनोवाणसिद्धोढुंढिविनायकः मोदकैर्ये
भिरत्रैवविंशत्यानामभिःपुमान् ३ यःस्तौतिमद्भक्तमनाःमद्गण
धानतत्परः स्तुतोनामसहस्रेणतेनाहंनात्रसंशयः ४ नमोनम
स्सुरवरपूजितायनमोनिरूपमंगलात्मने नमोनमोविपुलस

र्यंत्रेनयंत्रम अनेनमंत्रेणाअर्घ्यवेडपुदक्षिणां ईशानेजलं दया
त्मार्जनंकुर्यात् ततः प्राणायामं न्यासः
श्रीगणेशायनमः ओं श्रां अंगुष्ठाभ्यांनमः ॐ श्रीं तर्जनीभ्यांनम
ः ॐ श्रुं मध्यमाभ्यांनमः ॐ श्रैं अनामिकाभ्यांनमः ॐ श्रौं कनिष्ठि
काभ्यांनमः ॐ श्रः करतलकरपृष्ठाभ्यांनमः एवं हृदयादी ॐ
श्रां हृदयायनमः ॐ श्रीं शिरसेनमः ॐ श्रुं शिखायैवषट् ॐ श्रैं क
वचायहुं ॐ श्रौं नेत्रत्रयायवौषट् ॐ श्रः अस्त्रायफट् अथध्यान
यासापद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षी गंभीरव

र्तनाभीलतभरसिताभ्रवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणि
गणखचितैः स्नापिता हेमकुंभैर्नित्यंसा पद्महस्ता ममवसतुगृ
हेसर्वमांगल्ययुक्ता १ श्रीअथध्यानं अरुणाब्जमलसंस्था
तडजपुंनवर्णाकरकमलधृतेष्टाभीतियुग्मोद्भवाढ्य मणिमु
कुटविचित्रालंकृता कल्पजालैर्भवसिभुवनमाता सेतनंश्री
।श्रियैश्च महालक्ष्म्यैनमः ध्यानंसमर्पयामि हिरण्यवर्णां
हरिणीं सुवर्णरजतस्रजां चंद्रांहिरण्मयीं लक्ष्मीं जातवेदोमआवह

श्रीगणेशायनमः आचम्यप्राणानायम्यसर्वेगुणविशिष्टायांपुण्य
तिथौश्रीमहाविष्णुप्रीत्यर्थंब्राह्मणायउद्धाहरूपहिरण्यपूर्णकांस्यपा
त्रदानंमहंकरिष्ये तदंगत्वेनब्राह्मणपूजनंमहंकरिष्ये अथदान
मंत्रः विष्णुरूपीमहत्वोभूत्वापापापप्रणाशनः अपूपात्रप्रदानेनम
मपापंव्यपोहतु इदंकांस्यपात्रंउद्धाहरूपंसहिरण्यंब्राह्मणायतुभ्यं
महंसंप्रददे अथप्रार्थना नाशयत्राजगद्बीजभास्करप्रतिरूपक
दानेनानेनपुत्रांश्चसंपदंचाभिवर्द्धय यस्यहस्तेगदाचक्रेगरुडोयस्य
वाहनः शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु कलाकाष्ठादिरू

पेणानिमेषघटिकादिना योवंचयतिभूतानितस्मैकालात्मनेनमः
कुरुक्षेत्रमयेदेशःकालःपर्वद्विजोहरिः पृथ्वीसमामिदंदानंगृहा
णपुरुषोत्तम मलानांवविशुद्ध्यर्थंपापप्रशमनायच पुत्रपौत्रा
भिवृद्ध्यर्थंतवदास्यामिभास्करः इतिकांस्यपात्रदानंसमाप्तं
श्रीरस्तु गोभूतिलाहिरण्याज्यवासोधान्यगुडानिच रौप्यंलवणमि
त्याहुर्दशदानानिपंडिताः १ वावामंगेषुतिष्ठंतिभुवनानिचतुर्दश
यस्मात्तस्मात्शिवंमेस्यादिहलोकपरत्रच २ यस्मात्वंपृथिवीसर्वा
धेनुकेशववत्सत्रिभा सर्वपापहरसगावअतःशांतिंप्रयच्छमे ३ सर्वभू

नाश्रयाभूमिर्वराहेणासमुद्धृता अतस्तस्य फलदात्रतः शांतिप्र
यच्छ मे ३ महर्षेर्गोत्रसंभूता कश्यपस्य पुरा स्मृताः तस्मादेषा
प्रदानेन ममपापं व्यपोहतु ४ हिरण्यगर्भो मे कामधेनुषु संभू
तं सर्वक्रतुषु संस्थितां देवानामाद्यमाहारमतः शांतिप्रयच्छ मे
६ शरणं सर्वलोकानां लज्जायै रक्षणं परं सुवेषधारी वस्त्रं त्वमतः
शांतिप्रयच्छ मे ७ सर्वदेवमयं धाम सर्वोत्पत्तिकरं महत् प्राणि
नां जीवनोपायमतः शांतिप्रयच्छ मे ८ यथा देवेषु विष्णुस्त्वमाद्य व
रश्च जनार्दनः सामवेदस्तु वेदानां महादेवस्तु योगिनां ९ पुरा

वः सर्वमंत्राणां नारीणां पार्वती यथा तथा रसानां प्रवरः स देवेश्व
रसोमतः १० ममतस्मात्परं लक्ष्मीं ददस्व गुडसर्वदा इति गुड
प्रीतिर्यत्र पितरौ च विष्णुशंकरयोः सदा शिवनेत्रोद्भवं रूपम
तः शांतिप्रयच्छ मे ११ यस्मादत्र रसा सर्वे नोत्कृष्टा लवणं विना
शंभो प्रीतिकरं त्रिलोकमतः शांतिप्रयच्छ मे इति लवणं एवं दश
दानानां श्लोकाः ॥

श्रीगणेशायनमः श्रीनृसिंहोजयति अस्य श्रीलक्ष्मीनृसिंहमंत्रस्य
ब्रह्मऋषिः अनुष्टुप्छंदः श्रीनृसिंहो देवता क्षौं बीजं ह्रीं शक्तिः श्रीनृसिंहप्री

स्पर्थं जपे विनियोगः अथ षडंगः ॐ मिति सर्वत्र ॐ ह्रौं क्षां अंगुष्ठाभ्यां
नमः ह्रीं क्षीं तर्जनीभ्यां नमः ह्रूं क्षूं मध्यमाभ्यां नमः ह्रैं क्षैं अनामिकाभ्यां
नमः ह्रौं क्षौं कनिष्ठिकाभ्यां नमः ह्रः क्षः अस्त्राय फट् ॐ ह्रौं क्षां उग्रवी
रं महाविष्णुं भानं शान्तमात्मने हृदयाय नमः ह्रीं क्षीं ज्वलंतं सर्वतोमुखं वि
श्वात्मने नम इति शिरसि ह्रूं क्षूं नृसिंहं क्षीं वक्षोभं ज्योतिरात्मने नम
इति शिखायै वौषट् ह्रैं क्षैं मृत्युमृत्युं नमाम्यहं मायात्मने नम इति क
वचाय हुं ह्रौं क्षौं उग्रवीरं महाविष्णुं ज्वलंतं सर्वतोमुखं मित्यात्मा
त्मने नमः नेत्रत्रयाय वौषट् ह्रः क्षः नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमा

म्यहं सर्वात्मने नमः इति अस्त्राय फट् इति षडंगः ध्यानं सत्यज्ञानसु
खस्वरूपममलक्षराक्षिमध्यस्थवीयोगाद्रुद्रमतिप्रसंभवदनंभू
षासहस्रोज्वलं अक्षं चक्रं विनाकसाभयवरान्बिभ्राणमर्कच्छवि
छत्रीभूतफणीडमिंदुधवलं लक्ष्मीनृसिंहं भजे ॥ जाज्वल्यानलकोटिसा
स्वनखैरुद्दिलमद्दाहसंस्पृष्टकेशश्मश्रुं शंखचक्रौ च लक्ष्मीं दधानो नलस
मज्योतिषाभयदैः ज्वालामालापरीतैरविशशिदहनैः क्षीणदी
प्रजिह्वदंष्ट्रोग्रभूतकेशं वदनमपि वहन्यानुमानारसिंहः

श्रीगणेशायनमः॥

श्रीगणेशायनमः॥

आशा अभिलेखागार
1.514
ASHA ARCHIVES

श्रीबालात्रिपुरसुंदर्यैनमः ब्राह्मे मुहूर्ते शिरसि निजगुरुं ध्यात्वा
समुद्रमेखलेदेविपर्वतस्तनमंडले॰ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं
क्षमस्वमे॰ इतिभूमिंप्रार्थ्यबहिर्गमेनशौचादिस्नानंविधाय॰ आ
चम्य॰ पूर्वाभिमुखोभूत्वाआसनेउपविश्य॰ ह्रीं आधारशक्तिकमला
सनायनम॰ इत्यासनंसंपूज्य॰ शिरसि॰ ऐं ह्रीं श्रीं गुरुपरमगुरु॰ परा
परगुरुपरमेष्ठिगुरुभ्योनम॰ इतिसंपूज्य॰ आत्मतत्त्वंशोधयामिस्वा
हाविद्यातत्त्वंशोधयामिस्वाहा॰ शिवतत्त्वंशोधयामिस्वाहा॰ सर्वत
त्त्वंशोधयामिस्वाहा॰ इत्याचम्य॰ हस्तेपुष्पाजलंगृहीत्वा॰ अस्यश्रीबा

लात्रिपुरा मंत्रस्य दक्षिणामूर्त्ति ऋषि पंक्तिश्छंद श्रीबालात्रिपुरा
परमेश्वरी देवता ऐं बीजं ह्रीं शक्तिः सौः कीलकं ममाभीष्टसिद्ध्यर्थे
जपे विनियोगः दक्षिणामूर्त्ति ऋषये नमः शिरसि॰ पंक्तिश्छंदसे
नमो मुखे॰ बालात्रिपुरा परमेश्वरी देवतायै नमः हृदये॰ ऐं बीजा
य नमः गुह्ये॰ ह्रीं शक्तये नमः पादयो॰ सौः कीलकाय नमः सर्वां
गे॰ करन्यास॰ ऐं अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वाहा॰ सौः मध्यमा
भ्यां वषट्॰ ऐं अनामिकाभ्यां हुं॰ ह्रीं कनिष्ठिकाभ्यां वौषट्॰ सौः कर
तलकरपृष्ठाभ्यां फट्॰ ऐं हृदयाय नमः ह्रीं शिरसे स्वाहा॰ सौः शिखा

ये वौषट्॰ ऐं कवचाय हुं॰ ह्रीं नेत्रत्रयाय वौषट्॰ सौः अस्त्राय फट्॰ ध्यानं
अरुणकिरणजालैरंकिताशावकाशं विधृतजपवटीकापुस्तकाभीतिहस्ताइतरकरवराढ्या फुल्लकह्लारसंस्थां निवसतु हृदि बालामि
त्यकल्याणशीला॰ इति ध्यात्वा मूलेन यथाशक्ति अस्त्रा हलेपुष्पाक्ष
तैः पूजयित्वा गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जप॰ सिद्धि
र्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरी॰ इति जपं समर्प्य॰ स्तोत्रकवचादिकं
पठेत्॰॥

श्रीगणेशं नौमि रविरुवाच शिवदेवदेवजगतीपते विभो भर्गभी
मभवचंडभूषण भूतनाथ भवभीतितारकन्वा त्रनौम्यनतवांछित
प्रद १ चंडकूडमुडकूर्जटेहस्यक्षदक्षशतेनतुशानतं शांतशा
श्वतशिवापतेशिवत्वा त्र० २ नीललोहितसमीहितार्थदघोकलीव
नविरूपलोचन व्योमकेशपशुपाशनाशनत्वा त्र० ३ वामदेव
शितिकंठभूतभृचंडशेखरफणींडभूषण कामकृत्यभुपते महे
श्वरत्वानधा त्र्यंबकत्रिपुरसूदनेश्वरत्वाणाकृत्रितयनत्रयिमयं
कालकूटदलनानतकानकन्वा० ५ शर्वशीरहितशर्वसर्वगस्वर्गम

र्गसुखदापवर्गद अंधकासुररिपोकपर्दभृत्वा त्र० ६ शंकरोगु
गिरिजापतेपतेविश्वनाथविधिविष्णुसंस्तुत वेद्यदेवविदितावि
लेंगितत्वा त्र० ७ विश्वरूपपरमरूपवर्जिब्रह्मजिस्मरहितामृतप्र
दं वाग्मनोविषयदूरदूरगत्वा त्रनौम्यनतवांछितप्रद ८ इ
त्थं परीक्ष्यमार्तंडोमृडंदेवंमृडाणिका अथतुष्टाव प्रीतात्माशिव
वामार्द्धहारिणी ९ देवीत्वदीयचरणांबुजरेणुगौरीभालस्थलिं
वहतियःप्रणतिप्रवीणाः जन्मांतरेपिरजनीकरवारुलेखातांगो
रयत्यनितरांकिलतस्यपुत्रः १ श्रीमंगलेसकलमंगलजन्मभू

नेश्रीमंगलेसकलकिल्विषहलवहे श्रीमंगलेसकलसानवदव
हत्रिश्रीमंगलेखिलमिदंपरिपाहिविश्वं २ विश्वेश्वरित्वमसि
विश्वजनस्यकर्त्री त्वंपालयिष्यसितथाप्रलयेपिहंत्री त्वंत्रामकी
र्तनसंमुखसदछपुरापाखोनस्विनीहरतिपातककलंकक्षान्त
३ मातर्भवानिभवतीभवतीव्रतःस्वसंभारहारिशिशिरतपमिहा
लिभाया· धन्यासतावभुवनेषुतरावमाप्यायेषुस्फुरेत्नवभुभः क
रुणाकटाक्ष ४ येत्वांस्मरंतिसततंसहजप्रकाशांकाशीपुरी
स्थितीमतीनतमोक्षलक्ष्मी तान्संस्मरेत्स्मरहरोधृतभूतभूतो

त्रिवारारक्षराविचक्षराणपात्रभूतान् ५ मातस्तवांघ्रियुगलंवि
मलेहृदिस्थंयस्यालितस्यभुवनेसकलंकरस्थं योनामतेजपति
मंगलगौरिनित्यंसिद्धोष्टकंनपरिमुंचतितस्यगेहं ६ त्वंदेविवे
दजननीप्रणवस्वरूपागायत्र्यसित्वमभिवेद्विजकामधेनुः त्वं
व्याहृतित्रयमहाखिलमेकसिद्धेस्वाहास्वधासिसुमनः पितृत
प्रिहेतुः ७ गौरीत्वमेवशशिमौलिनिवेधसित्वंसावित्र्यसित्वम
सिचक्रिणीवाकलक्ष्मी स्त्वमेशरतपमिहमंगलगौरिमातः ८
स्तुत्वेतितांस्मरहरार्द्धशरीरशोभांश्रीमंगलाष्टकमहालवनेनभा

उ॰ देवीचदेवमसकृत्प्रणतपुरा॰ पन्नलीवभूवसविनाशितयो:
पुरस्तात् ९ देवदेवउ॰ उत्तिष्ठोत्तिष्ठभद्रंते प्रसन्नोस्मिमहामते
मित्रमन्त्रेत्रगोत्रियं प्रयच्छेनचराचरं १
श्रीगणेशायनमः हरिद्रारंचितादिव्यासौभाग्यंसुखसंपदा अ
नन्तोपुजयश्यामिहरिद्रासर्वकामदा हरीद्रांसमर्पयामी १ कुं
कुंमकामनादिव्यंकामनाकामसंभवा कुंकुंमंनार्चितादिव्यामन
:शांतिंप्रयच्छमे कुंकुंसमर्पयामि २ गुलालअविरंचैवसुवा
सितंमनोहरं इमंनिनंवरंदेहिगुलालप्रतिष्ठत्य ३ अथनां

बुलदान एवंगुणविशेषणविशि- वांभुभपुण्यतिथौमया
आचारेनस्यनांबुलमभक्षणांधरनस्यथावत्फलप्रा॰ श्रीविष्णु
प्रीत्यर्थंनांबुलस्योजापनं ब्राह्मणायनांबुलदानमहंकरिष्ये॰ वि
प्रायदत्वेविदुषोश्रोत्रियायकुटुंबिने नरकोत्तारणार्थायअच्छ
तः प्रियनामि नांबुलंसर्वदोषघ्नेसर्वसंपत्करंशुभं तस्मादस्यप्र
दानेनसफलास्तुमनोरथा १२
ओंविष्णुर्विष्णुश्रीमद्भगवतोमहापुरुषस्यविष्णुराज्ञा:याप्रवर्त
मानस्यअद्यब्रह्मणोद्वितीयपरार्धेश्रीश्वेतवाराहकल्पेवैवस्वतमनं

वतरेअष्टाविंशतितमेकलियुगेकलिप्रथमचरणेभरतवर्षेभर
तखंडेजाबुद्वीपेआर्यावर्तांतरगतहिमवतपादमूलेश्रीमत्रेपाल
देशांतरगतनेललितपट्टनेयहपुण्यभूमेपशुपतिसन्नीधानेशांव
मुलक्षेत्रेवाधमत्याःदक्षिणोकूलेप्रभावसाउत्तरेकूलेविक्रमश
केवोधावतारेष्वापार्थिवनामसंवत्छ्रेदक्षराणायणोश्रीसुर्जेशर
दरितेमासोत्तमेमासेमाहामांगल्यमासेयथायथायोगकरणा
मुईतकेयथायथारासीस्थानस्थितेडंभुसतसुएवंगुणाविशेश
णाविशिष्टायांसीवपुंण्यतिथौअमुककासरेअंघ्रतनक्षत्रेविष्णुदि

संनक्षत्रेविष्णुभोगेविष्णुकरणेएवंसहगुणाविशेषणाविशिष्टायांभू
मपुंतिथौमकगोत्रःअमुकवर्मायजमानस्यसमस्तुर्मारिनवम
हपीडादरिकरणार्थं
श्रीगणेशायनमः श्रीसर्वेश्वरायनमः आचम्य प्राणायाम
मुमुखश्चैकदंतश्चकपिलोगजकर्णकः लंबोदरश्चविकटोविघ्न
नाशोगणाधिपः धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः द्वाद
शैतानिनामानियपठेच्छृणुयादपि विद्यारंभेविवाहेचप्रवेशेनि
र्गमेतथासंग्रामेसंकटेचैवविघ्नस्तस्यनजायते शुक्लांबरध

रंदेवंशशीवर्णाचतुर्भुजंप्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये
अभीप्सितार्थसिध्यर्थंपूजितोयःसुरासुरैः सर्वविघ्नहरंतस्मैग
णाधिपतयेनमः सर्वमंगलमांगल्येशिवेसर्वार्थसाधके शर
ण्येत्र्यंबकेगौरीनारायणिनमोस्तुते सर्वदासर्वकार्येषुनास्तितेषां
ममंगलं एषांहृदिस्थोभगवान्मंगलायतनंहरिः तदेवल
ग्नंसुदिनंतदेवतारावलंचंद्रबलंतदेव विद्याबलंदैवबलंतदे
वलक्ष्मीपतेतेंघ्रियुगंस्मरामि कृशानिलयज्ञजलं कृतुमा
न्यादाय संकल्पः विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुष

स्यविष्णोराज्ञयाप्रवर्तमानस्यअद्यब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेत
राहकल्पेवैवस्वतमन्वंतरेअष्टाविंशतितमेकलियुगेकलिप्रथम
चरणेभरतवर्षेभरतखंडेजंबूद्वीपेआर्यावर्तांतर्गतहिमवदादि
मूलेश्रीमत्रेपालदेशांतर्गतललितपट्टनेपभुपतिसांनिध्यानेशंख
मूलक्षेत्रेवाग्मत्योःदक्षिणतीरेविक्रमोशकेउत्तरायणेवसंतऋ
तौमासोत्तमेमासेअमुकमासेशुक्लपक्षेअमुकतिथौअमुकमास
रेअद्यनक्षत्रेविष्णुदिवसनक्षत्रेविष्णुयोगेविष्णुकरणेएवंगुणग
णविशेषणविशिष्टायांशुभपुण्यतिथौअमुकगोत्रअमुकशर्मायज्ञ

तोदक्षिणा

मानः ममसूर्याहिनवग्रहपीडाहृदिकरणार्थभुभफलप्राप्त्यर्थः
॥ ॥ अथयोनिलक्षणाश्वरयाह ॥ योनिर्व्यासार्द्धदीर्घाविं
तिगुणालवा तयनाद्विभागानंगानावत्समंनात्परिधिरुप
रिगानावदग्रेसारस्य मृ निर्यंकुरुं विशेतीवलयदलयुगेनादि
नाधोविशालामूलान्सछिद्रनालांतरवटरुचिराश्वत्थपत्राकृति
सा· योनिर्व्यासार्द्धनदीर्घाविलारनतीयांशेविलीर्णा चतु र्विंशे
शेनोचाचतुर्विंशांशेनपरिधिमेखलायस्याः सानावनेवाग्रेणाव
तुर्विंशांशोनमिश्रं यथास्यान्तथाकुरुं प्रविशतिवलयदलयु

गेनवृत्तार्द्धद्वयेनयुतामधोविशाला ॥ अर्थाऽपरित्वल्पसंकोचव
तीमूलान्सकाशान्मधोसन्छिद्रनालंयस्याः सापद्मनालाकारत्वात्
लोकिः अंतर्मध्येवटोगतःसुविघनधारार्थयद्रुचिरासुंदरासा
अश्वत्थपत्राकृतिःस्यादितिव्याख्या ॥ ॥ शारदातिलके ॥
स्थलादारभ्यनालंस्याद्योन्यामध्येसरंध्रकमिति ॥
अथसप्तसप्तिकावाक्य ॥ देशकालौसंकिर्त्य अमुकगोत्रामुक
शर्मासर्वबाधाप्रशमनद्वारा तत्प्रतिसर्वोपद्रवरहितत्वस
रिद्धाभावेष्टवियोगरहित्वशत्रुक्षयराजद्वारा बलतोयोघभय

भावमहीमारीसमुद्भवाशेषोपसर्गोपशमनत्रिविधोत्पातोप्रश
मनदुर्गासान्निध्यधनधान्यसमन्वितयुद्धपराक्रमनिर्भयत्वरिपु
क्षयकल्याणोत्पत्तिकुलानंदः स्वप्नफलाभावसुखप्रफलप्रा
प्तिदाहरणग्रहपीडाशांतिबालग्रहाभिभूतबालसंतापशांति
करणनृपसंधानभेदमैत्रीकरणशेषदुष्टात्मबलहानिरक्षो
भूतपिशाचनाशनानाविधोपद्रवकरणपापक्षयारोग्यप्रभ
मत्वसर्वसंकटविमुक्तिसिंहादिदस्युदूरपलायनकामना
यमार्कंडेयपुराणोत्तर्गतसावर्णिः सूर्यतनयइत्यारभ्यसवर्णि

भविनासनूरित्यंतस्यदेविमहात्म्यप्रकाशकस्य ब्राह्मणाधारोनवाह्न
निपाठमेहंकरिष्ये॥
ब्रह्मार्पणंब्रह्महविर्ब्रह्मामौब्रह्मपाकुतंब्रह्मैवतेनागंतव्यंब्रह्मकर्म
समाधिनांहरिर्दाताहरिर्भोक्ताहरिरत्रंप्रजापतीहरिर्विप्रप्रास्थो
भुक्तेभोजयंतेहरिः चतुर्भिश्चर्यतुर्भिश्चद्वाभ्यांपंचभिरेवचहव्यवेव
पनछाभ्यासमेविष्णुःप्रसीदतु ॥ १ एकोविष्णुसहभूतंपथाभू
तान्याभुक्तेविश्वभुगव्यय अक्षेनब्राह्मणाभोजनेनमम समस्तपि
तृस्वरूपीजनार्दनवासुदेवःप्रीयतानमः २ अपेक्षितंयायितव

ह्यात्मं चैवानपेक्षितउपविश्यपुत्रंनैवभोजयंस्वस्थमानसैः विश्व
तेशाकपाकानांशोचनंनाछिभुज्यवांअत्यंतन्यरिसाऽपंसंकोच
नोषकारयेत्॥
देवराजसेव्यमानपावनाघ्रिपंकजंव्यालयज्ञसूत्रमिंदुशेखरंकृपाक
रं नारदादियोगिवृंदवंदितंदिगंबरंकाशिकापुराधिनाथकालभै
रवंभजे १ भानुकोटिभास्वरंभवाब्धितारकंपरंनीलकंठमीप्सिता
र्थदायकंत्रिलोचनं कालकालमंबुजाक्षमक्षमंकाशि० २
भुक्तिमुक्तिदायकंप्रशस्तचारुविग्रहंभक्तवत्सलंसम

लोकविग्रहं निष्करान्मनोज्ञहेमकिंकिणीलसत्कटिका० ३
भूलटक्कपाशदंडपाणिमादिकारणंश्यामकायमादिदेवमक्ष
रंनिरामयं भीमविक्रमंविचित्रताडवंह्यनामयंका० ४ रत्नपादु
काप्रभाभिरामपादयुग्मकंनित्यंमद्वितीयमिष्टदैवतंनिरंजनं म
मुदर्पनाशनंकरालदंष्ट्रभीषणंका० ५ धर्मसेतुपालकंधर्ममार्ग
नाशनंकर्मपाशमोचकंसुकर्मदायकंविभुं स्वर्णवर्णकेशपाशा
शोभितांतमंडलंकाशि० ६ अट्टहासविपंचपंजांडकोशसंततिंच
ष्टिपातनष्टपातजालमुग्रशासनं अष्टसिद्धिदायककपालमालि

काधरंका० ७ भूतसंघनायकंविशालकीर्तिशालिनंकाशिवास
लोकपुराधपापशोधकंप्रभुंगीर्वाणमार्गकोविदंपुराननंजगत्पति
का० ८ कालभैरवाष्टकंपठंतियेमनोहरंज्ञानमुक्तिसाधनंप्र
शस्तपुण्यवर्द्धनं शोकमोहदैन्यलोभकोपतापनाशनंते प्रयांति
कालभैरवांघ्रिसन्निधिंध्रुवं ९ इतिश्रीशंकराचार्यविरचितंकाल
भैरवस्तोत्रसंपूर्णम् ॥
श्रीगणेशायनमः॥केशवः नारायणः॥माधवः गोविंदः॥विष्णुः॥विष्णुः वि
ष्णुः मधुसूदनः॥त्रिविक्रमः वामन॥श्रीधरः॥हृषिकेशः॥पद्मनाभः॥

दामोदरः शंकरषणः॥वासुदेवः॥प्रद्युम्नः॥अनिरुद्धः॥पुरुषोत्तमः॥अधो
क्षजः॥नारसिंहः॥अच्युतः॥जनार्दनः॥उपेंद्रः॥हरिः॥श्रीकृष्णायनमः॥वाक्
वाक्॥प्राण॥प्राण॥चक्षुः॥चक्षुः॥श्रोत्र॥श्रोत्रः॥श्रीनाभीहृदयः॥कंठः॥
शीरः शीरवाबाहुभ्यांयशोबलं॥ममउपातदुरितक्षयार्थंमहावाक्ये वासुता॥
संध्योपासनेमहंकरीष्ये॥यद्धित्वयाधृतालोकादेवित्वंविष्णुनाधृतत्वंच
धरपमानित्यपवित्रंकुरुचासनं॥उर्द्धकेशिविरूपाक्षिमासशोणितभोज
ने॥तिष्ठदेविशीखाबद्धेचामुंडेअपराजिते॥विष्णोनामसहस्रशीखाबा
वधकरोम्यहं॥अपवित्रः॥पवित्रोवासर्वावस्थांगतोपीवायस्मरेत्पुंडरीकां

क्षंसबाह्याभ्यंतरः॥शुचिः॥इतिआत्माहिसीचेत्॥ॐपुण्डरिकाक्षायनमः॥
ममउपात्तदुरितक्षयार्थंब्रह्मास्येप्रातःसंध्योपासनमहंकरिष्ये॥ॐकारस्यब्रह्म
ऋषिर्गायत्रीछंदःपरमात्मादेवतासर्वकर्मारंभेविनियोगः॥ॐभूःपुनातु॥
ॐभुवःपुनातु॥ॐस्वःपुनातु॥ॐवकारंहृदये॥ॐस्यकारंकंठे॥ॐरिकारं
मुखे॥ॐमकारंतालुदेशे॥ॐहिकारंनासिकाग्रे॥ॐधिकारंनेत्रयोः॥ॐ
योकारंभ्रुवोर्मध्ये॥ॐद्वितियोकारंललाटे॥ॐनःकारंपूर्वमुखे॥ॐ
प्रकारंदक्षिणमुखे॥ॐचोकारंपश्चिममुखे॥ॐदकारंउत्तरमुखे॥ॐ
॥यकारंमूर्ध्नि॥ॐव्यंजनात्मकारंसर्वांगे॥एवंविन्यस्यगायत्रीध्यायेत्॥
२॥

नातुःॐमहःपुनातु॥ॐजनाःपुनातु॥ॐतपःॐपुनातु॥ॐसत्यंपुना
तु॥ॐतत्सवि०दयात्॥सर्वंपुनातु॥ॐगायत्रीत्र्यक्षराबालीसांक्षसूत्र
कमंडलुम्॥१॥रक्तवस्त्रांचतुर्वक्त्रांहंसवाहनसंस्थिताम्॥ऋग्वेदसंभू
तोत्पन्नांचतुर्हस्तांवरप्रदाम्॥ब्रह्माणीब्रह्मदैवत्यांब्रह्मलोकनिवासिनीं॥
आवाहयाम्यहंदेविमापान्तिसूर्यमंडलात्॥आगच्छवरदेदेविअक्षरे
ब्रह्मवादिनि॥गायत्रिछंदसामातर्ब्रह्मयोनीनमोस्तुते॥२॥इतिध्यान
॥प्राणायामस्यपरब्रह्मऋषिः॥परमात्मादेवतादेविगायत्रीछन्दः॥प्राणा
यामेविनियोगः॥ॐनमोभगवतेवासुदेवाय॥ॐभूःॐभुवःॐस्वःॐ
महःॐजनःॐतपःॐसत्यं॥ॐतत्सवि०दयात्॥ॐआपोज्योतिरसोमृ

तद्ब्रह्म भूर्भुवःस्वरोम्॥ इतिप्राणायामत्रयं कुर्यात्॥ हस्तेजलं गृहीत्वा॥ ॐ सु
र्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः॥ पापेभ्यो रक्षन्तां॥ यद्रात्र्या
पापमकार्षं॥ मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेणाशिश्ना रात्रिस्तदवलुं
पतु यत्किंचिद्दुरितं मयि इदमहं मामभृत योनौ सूर्यज्योतिषि जुहोमि
स्वाहा॥ ततो द्विरोचमनं॥ अथ मार्जनं॥ ॐ आपो हि ष्ठा मयो भुवस्तान ऊर्जे
दधातन महे रणाय चक्षसे। यो वः॥ शिवतमो रसस्तस्य भाजयतेह नः॥
उशतीरिव मातरः तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ॥ आपो जन
यथा च नः॥ सुमित्रीयान आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु यो

स्मान्द्वेष्टि यं च वयं द्विष्मः॥ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादि
व पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥ ऋतं च सत्यं चाभीद्धात्तपसो
ध्यजायत॥ ततो रात्र्यजायत॥ ततः समुद्रो अर्णवः॥ समुद्रादर्णवादधि
संवत्सरो अजायत॥ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ सूर्याचं
द्रमसौ धाता यथापूर्वमकल्पयत्॥ दिवं च पृथिवीं चान्तरिक्षमथो स्वः॥ अ
स्य श्रीब्रह्मणः पवित्रीकरणमन्त्रस्य निग्रहानुग्रहकर्ता प्रजापतिऋषिः॥